योगशतक–सम्पादनम्*

ला. द. भारतीयसंस्कृतिविद्यामन्दिरग्रन्थमालायाश्चतुर्थग्रन्थाङ्करूपेण याकिनीमहत्तरासूनुश्रीहरिभद्रसूरिप्रणीतं स्वोपज्ञटीकासहितं 'योगशतकप्रकरणम्' तथा खण्डितापूर्णरूपेण लब्धत्वाद् अज्ञातग्रन्थ-ग्रन्थकाराभिधानो ग्रन्थविषयविभागावलोकनेन श्रीहरिभद्रसूरिप्रणीतः 'ब्रह्मसिद्धान्तसमुच्चयः' इति अस्माभिः परिकल्पिताभिधानो ग्रन्थश्चेति प्रकरणयुगलं प्रकाश्यते ।

तत्र योगशतकं मूलमात्रं डॉ० झवेरी इन्दुकलाभगिन्या पाण्डित्यपूर्णगूर्जरगिरानुवादेन विस्तृतप्रस्तावनया च सह सम्पाद्य प्रसिद्धिं प्रापितम् । साम्प्रतं तदेव अद्यावध्यज्ञातया स्वोपज्ञटीकया समलङ्कृतं प्रसिद्धिं नीयते । अस्य किलैकैव ताडपत्रोपरि लिखिताऽतिप्राचीना शुद्धप्राया प्रतिः कच्छदेशान्तर्गतमांडवीनगरस्थखरतरगच्छीयजैनज्ञानभाण्डागारे सुरक्षिताऽऽसीत् । सा च प्रतिस्तद्भाण्डागाररक्षक-मांडवीजैनश्रीसङ्घमान्यमहानुभावश्रेष्ठिवर्यश्रीमोहनलाल पोपटभाई शाहद्वारा समासादिता । अस्याः प्रतेः षट्त्रिंशत्पत्राणि । प्रतिपत्रं ताडपत्रपृथुलत्वानुसारेण कस्मिंश्चित्पत्रे चतस्रः यावत् कस्मिंश्चित्पत्रे सप्तापि पङ्क्तयो वर्तन्ते । प्रतिपङ्क्ति क्वचित्षट्षष्टिः सप्ततिः यावत् क्वचिदशीत्यक्षराण्यपि लिखितानि दृश्यन्ते । प्रतिरियं मध्ये छिद्रयुता विभागद्वयेन च लिखिता वर्तते । आयाम-पृथुलत्वे किलास्याः प्रतेः १३।×२। इंचप्रमितमस्ति । प्रतिरियं केनापि विदुषा मुनिप्रवरादिना साद्यन्तं वाचिता संशोधिता चेति शुद्धप्राया क्वचित्क्वचिच्च टिप्पणीयुताऽपि वरीवृत्यते । अस्याः प्रतेः प्रान्तभागे "संवत् ११६५ फाल्गुन सुदि ८ लिखितेति" इतिरूपा लेखनसमयावेदिका पुष्पिका वर्तते इति अस्याः प्रतेः लेखनकालः ११६५ वर्षरूपः स्पष्टमेव ज्ञायते ।

शुद्धप्रायाया अस्या एकस्या एव प्राचीनतालपत्रीयप्रतेराधारेणास्य स्वोपज्ञटीकाविभूषितस्य योगशतकप्रकरणस्य सम्पादनं संशोधनं च विहितमस्ति । यद्यपि प्रतिरियं सामान्यभावेन शुद्धरूपा वर्त्तते तथाप्यनेकानेकेषु स्थलेष्वशुद्धयो वर्त्तन्त एव इत्यतस्तत्र तत्र स्थलेषु तत्तद्विषयकग्रन्थाद्याधारेणास्य ग्रन्थस्य सुचारुसंशोधनकृते प्रयतितमस्ति ।

* श्रीहरिभद्रसूरिविरचितं योगशतकं स्वोपज्ञवृत्त्या सहितम्, ब्रह्मसिद्धान्तसमुच्चयश्च (प्रकाशक ला. द. भारतीय संस्कृति विद्यामन्दिर, अमदावाद, ई. स. १९६५) इत्येतस्य सम्पादनस्य प्रस्तावना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रन्थस्यास्य पाण्डित्यपरिपूर्णा प्रतिकृतिः (प्रेस कॉपी) भोजककुलमण्डनस्य गृहस्थभावेऽपि प्राप्तात्मरमणताधर्मस्य धर्मात्मनो गिरधरलालस्य पौत्रेण तथा आत्मरमणतानिष्ठस्य धर्मभावनावासितान्तःकरणस्य मोहनलालस्य नन्दनेन अमृतलालपण्डितेनातिसावधानतया विहितेत्यस्य ग्रन्थस्य सम्पादने संशोधने चातिसौकर्यं सञ्जातम् ।

द्वितीयः किल खण्डितापूर्णलब्धत्वाद् अस्मत्कल्पिताभिधानो ब्रह्मसिद्धान्तसमुच्चयनामा ग्रन्थोऽस्मिन्ग्रन्थाङ्के प्रकाश्यते । अयं किल ग्रन्थोऽणहिल्लपुरपत्तनीयशतशःखण्डीभूततालपत्रीयग्रन्थराशिमध्यात् शीर्णविशीर्णतालपत्रखण्डरूपेण मयैव समुपलब्धो मम पार्श्वे एव वर्तते । इयं हि प्रतिः प्रतिपत्रं सञ्जातद्वित्रखण्डा द्वात्रिंशत्पत्रात्मिकाऽपूर्णा ४२३ श्लोकपर्यन्तमासादिताऽस्ति । प्रतिपत्रं चतस्रः पञ्च वा पङ्क्तयो वर्त्तन्ते । प्रतिपङ्क्ति पञ्चचत्वारिंशद् यावदष्टचत्वारिंशदक्षराणि लिखितानि निरीक्ष्यन्ते । प्रतिरियं प्रायः शुद्धैव वर्त्तते तथापि क्वचित्क्वचिदशुद्धयोऽपि दृश्यन्ते । अस्याः प्रतेरन्तिमं पत्रं नोपलब्धमिति निश्चिततया न ज्ञायते कस्मिन्समये लिखितोऽयं ग्रन्थः ? इति, तथापि लिपितालपत्रीयजातिलेखनपद्धत्याद्यवलोकनेन इयं प्रतिः द्वादश्यां शताब्द्यां लिखितेत्यनुमीयते । प्रतिरियमायाम-पृथुलत्वे ११॥ × १॥। इंचप्रमाणा वर्त्तते । अस्याः प्रतेः द्वादशं पत्रं सर्वथैव नोपलब्धम् । तथा ७ तः १०, २२, २४, २६, २९तः ३२ पत्राणामुत्तरविभागो नष्ट इति नोपलब्धः ।

अस्याः शीर्णविशीर्णखण्डखण्डीभूतापूर्णप्रतेराधारेणास्य ब्रह्मसिद्धान्तसमुच्चयग्रन्थस्य सम्पादनं संशोधनं च विहितमस्ति । अस्यापि ग्रन्थस्य वैदुष्यपूर्णा प्रतिकृतिः (प्रेस कॉपी) पण्डितश्रीअमृतलालेनैवातिसावधानतया महता श्रमेण निर्मिताऽस्ति, येनास्यापि सम्पादने संशोधने च समधिकं सौकर्यमजनि ।

किञ्च—अस्य ग्रन्थयुगलस्य संशोधनं केवलं मयैव विहितमिति नास्ति । किन्तु पण्डितश्रीसुखलालजित्—ला. द. भा. सं. विद्यामन्दिरमुख्यनियामकदलसुखमालवणिया–पण्डित अमृतलाल–मुनिप्रवरश्रीजम्बूविजयजी–प्रज्ञांशमुनिवरश्रीकान्तिविजयप्रभृतिभिः स्थानस्थानेषु संशोधनं संसूचनं च विहितमस्ति । अपि च पण्डितश्रीअमृतलालेन तु प्रतिकृतिविधानादारभ्य प्रुफपत्राद्यवलोकन–परिशिष्टविधानादिसमग्रकार्येषु दत्तचित्ततया साहाय्यं विहितमस्तीति समवधारयन्तु विद्वांसः ।

ग्रन्थयुगलमप्येतद् योगविषयकं वर्तत इति तन्मार्गसिसाधयिषवो जिज्ञासवो वा मुनिवरा विद्वांसश्चावश्यमेवाऽऽसादयिष्यन्ति स्वेप्सितमेतद्ग्रन्थयुगलावगाहनेन ।

ग्रन्थकारः

स्वोपज्ञटीकासमलङ्कृतस्यास्य योगशतकाख्यप्रकरणस्य प्रणेता याकिनीमहत्तरासूनुराचार्यश्रीहरिभद्रसूरिरेवेति तत्पुष्पिकाद्यवलोकनेन स्पष्टमेव ज्ञायते । प्रस्तुतग्रन्थकर्तुराचार्यस्य सत्तासमय–निवासस्थान–जीवन–पाण्डित्य–ग्रन्थनिर्माणादिविषये डॉ. याकोबी-पण्डितसुखलालजी-श्रीजिनविजयजी–प्रज्ञांशश्रीकल्याणविजयजी–डॉ. झवेरी इन्दुकलाभगिनीप्रभृतिभिरनेकैर्विद्वत्प्रवरैः सुबहु विचारितमुल्लिखितमपि चास्तीति नात्रार्थे कश्चित्प्रयासो विधीयते । केवलं श्रीहरिभद्रसूरिपादविरचितनवीनग्रन्थनामोल्लेखादिविषये किञ्चित्प्रयत्यते । तत्र ताव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्प्रकाश्यमानैषा योगशतकप्रकरणस्य स्वोपज्ञटीका कच्छदेशीयमांडवीनगरस्थितखरतर-गच्छीयजैनज्ञानकोशात् साम्प्रतमेव प्राप्ताऽस्ति । न खल्वियं ग्रन्थरचनाऽद्य यावद् ज्ञातचराऽऽसीदिति । तथाऽस्यां स्वोपज्ञटीकायां " निर्लोठितं चैतदुपदेशमालादिष्विति नेह प्रयत्नः " (पृ. २४) इत्युल्लेखदर्शनात् साम्प्रतं कुत्राप्यदृश्यमानः श्रीमद्भिर्विरचित उपदेशमालाख्यो ग्रन्थ आसीदिति निश्चीयते । एवमेव श्रीमद्भिर्मलयगिर्याचार्यपादैः श्रीजिनभद्रगणिक्षमाश्रमणचरणनिर्मितसङ्ग्रहणीप्रकरणवृत्तौ श्रीहरिभद्रसूरिपुरन्दरविहितायास्तद्वृत्तेः स्थानस्थानेषु उल्लेखः कृतोऽस्तीत्यतस्तत्संसूत्रिता सङ्ग्रहणीप्रकरणवृत्तिरप्यासीदिति । उपलभ्यते हीयं जेसलमेरुभाण्डागार-मत्सङ्गृहीतज्ञानकोशादिष्विति । अपरं च श्रीमद्भिर्याकिनीमहत्तरासूनुभिः स्वकीयाऽऽवश्यकशिष्यहिताख्यलघुवृत्तिप्रारम्भे " यद्यपि मया तथाऽन्यैः कृताऽस्य विवृतिस्तथापि सङ्क्षेपात् । तदुचितसत्त्वानुग्रहहेतोः क्रियते प्रयासोऽयम् । " इत्युल्लेखदर्शनाद्विदुषाम् तद् ज्ञातचरमेव यत्-श्रीमद्भिः पूर्वं आवश्यकसूत्रोपरि बृहद्वृत्तिर्विरचिता, तदनन्तरं शिष्यहिताख्या लघुवृत्तिरिति । तथा मलधारिश्रीहेमचन्द्रसूरिपादसंसूत्रितशिष्यहितावृत्तिटिप्पनकान्तर्वर्त्तिनः " यद्यपि मया वृत्तिः कृता " इत्येवंवादिनि च वृत्तिकारे "चतुरशीतिसहस्रप्रमाणाऽनेन वाऽऽवश्यकवृत्तिरपरा कृताऽऽसीदिति प्रवादः " इत्युल्लेखदर्शनाच्च सा बृहद्वृत्तिश्चतुरशीतिसहस्रश्लोकप्रमाणाऽऽसीदित्यपि विदितचरमेव प्रज्ञावतां प्राज्ञानामिति । तथापि 'तत्र बृहद्वृत्तौ तैः सूरिशक्रैः के के पदार्थाः कथं व्यावर्णिताश्चर्चिता वाऽऽसन् ?' इत्यावेदकोऽतिगाम्भीर्यपूर्ण एक उल्लेखस्तैः स्वविरचितनन्दिसूत्रलघुवृत्तौ " साङ्केतिकशब्दार्थसम्बन्धवादिमतमप्यावश्यके नयाधिकारे विचारयिष्यामः " (पृ. ६८) इतिरूपो निष्टङ्कितोऽस्ति । एतदेकोल्लेखमात्रदर्शनादेतज्ज्ञायते यत्--श्रीमद्भिस्तत्र बृहद्वृत्तौ दार्शनिकजगदाश्चर्यकारका एतादृशः संख्यातीताः पदार्था वादिमताश्च व्यावर्णिताश्चर्चिता निरस्ताश्चापि भविष्यन्तीति । दुर्दैवमेतदास्माकीनं यत्सा चिरकालादेव दुःषमाकालेन कवलितेति ।

ब्रह्मसिद्धान्तसमुच्चयकारः

मत्परिकल्पितनाम्नः प्रस्तुतस्य ब्रह्मसिद्धान्तसमुच्चयाख्यस्यास्य प्रकरणस्यान्तिमं पत्रं तावन्नोपलब्धमिति तत्प्रणेतृतन्नामादिविषयकं किमपि प्रमाणं साक्षान्नास्तीति प्रागेवाऽऽवेदितम् । तत्र खण्डितापूर्णलब्धस्यास्य प्रकरणस्य 'ब्रह्मसिद्धान्तसमुच्चयः' इति नाम ग्रन्थाद्यश्लोकोक्तविषयानुसारेण मत्परिकल्पितमेव । निर्माता पुनरस्य प्रकरणस्यैतद्ग्रन्थगतविषयादिविचारणेन याकिनीमहत्तरासूनुराचार्यश्रीहरिभद्रपाद आभाति । तथाहि—तत्र तावद् यथाऽन्येषु श्रीहरिभद्राचार्यविनिर्मितेषु योगदृष्टिसमुच्चयप्रभृतिग्रन्थेषु श्रीमहावीरजिननमस्कारः प्रतिपाद्यविषयोल्लेखश्च दृश्यते तथाऽत्रापि ग्रन्थ इति । तथा योगदृष्टिसमुच्चय--योगबिन्दु-अष्टकप्रकरण-विंशतिविंशिकादिप्रकरणेषु यादृशी विषयविभागविचारणपरिपाटी यादृशश्च पारिभाषिकशब्दप्रयोगो वरीवृत्यते तथैवात्रापि ग्रन्थे तादृश्येव विषयविचारणपरिपाटी तादृश एव च पारिभाषिकशब्दादिप्रयोगो दृष्टिपथमवतरति । तथा ललितविस्तरावृत्त्यादिवदत्रापि प्रकरणे 'आगमेनानुमानेन०' इति श्लोकोऽपि वर्तते । एवमेव योगबिन्दुप्रकरणे 'दानं भृत्याविरोधेन' इत्यत्र यथा 'भृत्याविरोध' वाक्यप्रयोगो वर्तते तथाऽत्रापि प्रकरणे 'भृत्यानानुपरोधेन' (श्लो० १९०) 'भृत्यानामुपरोधश्च' (श्लो० २००) इत्यत्र दृश्यते । तथैव षोडशकप्रकरणे 'अद्वेषो जिज्ञासा' इत्यादिपद्ये यथाऽष्टाङ्गानां निरूपणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाऽत्रापि 'अद्वेषश्चैव जिज्ञासा' (श्लो० ३५) इति पद्ये निरीक्ष्यते। ललितविस्तरावृत्ति-योगदृष्टिसमुच्चयादिषु यथा इच्छायोगादीनां स्वरूपं वर्तते तथैवाऽत्रापि प्रकरणे १८९-९१ पद्येषु निरूप्यते। तथा योगदृष्टिसमुच्चये यथाऽवेद्यसंवेद्यपदवर्त्यपि मित्राद्याद्यचतुर्दृष्टिगतविशिष्टगुणान्वितो व्यावर्णितोऽस्ति तथाऽत्रापि 'मिथ्यादृष्टिरपि ह्युक्तः स च तादृक्क्रियान्वितः' इति ५४ पद्ये व्यावर्णितोऽस्ति।

एतानि पुनर्विशिष्टस्थानानि यान्यस्य प्रकरणस्य श्रीहरिभद्राचार्यकृतत्वमावेदयन्ति--

१. अत्राधिकारिणोऽप्युक्ता अपुनर्बन्धकादयः। त्रय-एव० श्लो० ३७। अहिगारी पुण एत्थं विण्णेओ अपुणबंधगाइत्ति। —योगश० गा० ९.

२. न जानाति तामन्यो नष्टनाशनः-श्लो० १३६।
गुरुणो अजोगिजोगो० जोगिगुणहीलणाणट्ठुणासणा० —योगश० गा० ३७.

३. देवताबहुमानेन—श्लो० १६३।
गुरु-देवयाहि जायइ--योगश० गा० ६२.

४. शिवज्ञानं य आसाद्य--इत्यादि २६३-६५ शिवागमश्लोकाः
एतीए एस जुत्तो सम्मं असुहस्स खवग मोणेओ। —योगश० गा० ८५.

५. कायपातादिभावेऽपि शुभालम्बनयोगतः। —श्लो० १७१।
तह कायपाइणो ण पुण चित्तमहिकिच्च बोहिसत्त त्ति। —योगश०—गा० ८८.

६. आश्चर्यमात्रतस्त्वाशु कश्चित् तेनैव जन्मना। —श्लो० ४१३।
जइ तब्भवेण जायइ जोगसमत्ती।—योगश० गा० ९२.

७. श्लो० ३९२तः ९४ मृत्युज्ञानचिह्नानि।
णाणं चागम-देवय-पइहा--सुमिणंधराइऽदिट्ठीओ। —योगश० गा० ९७.

सङ्क्षेपेणैतेषामुपर्युल्लिखितानां प्रमाणानामनुसन्धानेनेदं ब्रह्मसिद्धान्तसमुच्चयप्रकरणं श्रीहरिभद्राचार्यसंसूत्रितमेवाऽऽभाति। अपि चात्र मुख्यत्वया योगशतकप्रकरणेनैव सह तुलना विहिताऽस्ति। किञ्च यदि श्रीहरिभद्रसूरिपादप्रणीतयोगबिन्दु-योगदृष्टिसमुच्चय-अष्टकप्रकरण-षोडशकप्रकरण-विंशिकाप्रकरणादिभिः सहास्य प्रकरणस्य तुलना विधीयेत तदाऽस्य प्रकरणस्य श्रीहरिभद्रकृतत्वनिश्चायकानि प्रभूतानि प्रमाणानि समुपलभ्येरन्नित्यत्र न कश्चित्सन्देहलेश इति। प्रयतिष्यते किलैतदर्थं समयान्तरे पृथग्लेखरूपेण।

अत्रैतत्किल ज्ञापनीयमस्ति यदिदं ब्रह्मसिद्धान्तसमुच्चयाख्यं प्रकरणं द्वात्रिंशत्पत्रं ४२३ पद्यं यावच्च खण्डितापूर्णरूपेण सम्प्राप्तमस्ति तथाप्यस्य प्रकरणस्य प्रान्तभागवर्त्ति एकं पत्रं पत्रद्विकमेव वा विनष्टं सम्भाव्यते, नाधिकमिति।

अपि चैतत्प्रकरणावलोकनेनैतदपि सम्भाव्यते यत्-श्रीमद्भिर्हरिभद्रसूरिचरणैः सर्वदर्शनसमन्वयसाधकान्यन्यान्यप्येतादृशि भिन्नभिन्नानि प्रकरणानि संसूत्रितान्यवश्यमेव भविष्यन्तीति।

अतस्तावदिदं निवेद्यते—येन कच्छमांडवीस्थखरतरगच्छीयजैनभाण्डागारप्रतिपालकेन शाह मोहनलाल पोपटलाल महानुभावेन स्वोपज्ञटीकायुता योगशतकप्रकरणप्रतिरतिचिर-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

कालं यावदस्मभ्यमौदार्यभावेन समर्पिता, यैश्च विद्वत्प्रवरैरेतद्ग्रन्थयुगलस्य संशोधने भिन्न-भिन्नरूपेण महामूल्यं साहाय्यं वितीर्णं तेभ्यः सर्वेभ्योऽपि साभारं धन्यवाददानं न विस्मरति मम हृदयम् ।

निवेदकः—
बृहद्गुरुप्रवर्त्तककान्तिविजयशिष्याणु-
गुरुप्रवरश्रीचतुरविजयचरणोपासकः
मुनिः पुण्यविजयः ।

['श्रीहरिभद्रसूरिविरचितं योगशतकं स्वोपज्ञवृत्त्या सहितम्, ब्रह्मसिद्धान्तसमुच्चयश्च' इत्येतस्य सम्पादनस्य प्रस्तावना, अमदावाद, १९६५]

प्रबुद्धरौहिणेय—सम्पादनम्*

अस्य प्रबुद्धरौहिणेयाभिधनाटकस्य कर्तारः श्रीमद्वादिदेवसूरिशिष्यश्रीजयप्रभसूरिशिष्याः श्रीमन्तो रामभद्रमुनिवरा इति प्रस्तावनान्तर्गतेन—

"वादीन्द्रस्मयसंचयव्ययचणः श्रीदेवसूरिः प्रभु-
स्तद्गच्छाम्बुधिपार्वणोऽमृतरुचिः सैद्धान्तिकग्रामणीः ।
श्रीमत्सूरिजयप्रभः शमनिधिस्त्रैविद्यवृन्दारक-
स्तच्छिष्योऽस्ति समस्तनिस्तुषगुणारामः स रामः कविः ॥

सत्यं सन्त्येव शीतांशुसंगीतवनितादयः ।
धुर्यं किमपि माधुर्यं रामभद्रगिरां पुनः ॥

ततस्तद्विरचितं सकर्णश्रव्यनव्योक्तिसूक्तिमुक्ताञ्चितं विविधस्निग्धरसवैदग्ध्यनिधानं प्रबुद्धरौहिणेयाभिधानं प्रकरणमभिनेष्यामः ।"
इत्यनेन पाठेन प्रकटमेव प्रतीयते ।

सत्तासमयश्चैतेषां विक्रमीयत्रयोदशशताब्दीय एव, श्रीमद्वादिदेवसूरिप्रशिष्यत्वात् श्रीमत्पार्श्वचन्द्रपुत्र-श्रीमयशोवीर-श्रीअजयपालकारितश्रीयुगादिदेवप्रासादान्तरस्य नाटकस्य सामाजिकैरभिनयसमादेशनाच्च ।

* श्रीरामभद्रमुनिविरचितं प्रबुद्धरौहिणेयम् (प्रकाशक—श्री जैन आत्मानन्द सभा, भावनगर, ई. स. १९१८) इत्येतस्य सम्पादकीयनिवेदनम् ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

श्रीमतां वादिदेवसूरीणां प्रभावकचरित्रान्तर्गतेन
"श्रीभद्रेश्वरसूरीणां गच्छभारं समर्प्य ते ।
जैनप्रभावनास्थेमनिस्तुषश्रेयसि स्थिताः ॥
रसयुग्मरवौ वर्षे १२२६ श्रावणे मासि संगते ।
कृष्णपक्षस्य सप्तम्यामपराह्णे गुरोर्दिने ॥
मर्त्यलोकस्थितं लोकं प्रतिबोध्य पुरन्दरम् ।
बोधका इव ते जग्मुर्दिवं श्रीदेवसूरयः ॥
त्रिभिर्विशेषकम् ॥"

अनेन पद्यत्रितयेन १२२६ वर्षे दिवंगतत्वं प्रकटमेव । एतेषामेव च सूरिवराणां प्रशिष्यत्वादेतद्ग्रन्थकर्तुस्त्रयोदशशताब्द्यन्तर्भावित्वं स्पष्टमेव ।

श्रीमद्यशोवीरसत्तासमयोऽपि त्रयोदशशताब्दीय एवेति प्राचीनजैनलेखसंग्रहद्वितीयभागान्तर्गतश्रीजालोरदुर्गलेखकात्स्पष्टमेवाववुध्यते । स चायम्—

"ॐ ॥ संवत् १२२१ श्रीजाबालिपुरीयकाञ्चनगिरिगढस्योपरि प्रभुश्रीहेमसूरिप्रबोधितश्रीगूर्जरधराधीश्वरपरमार्हतचौलुक्यमहाराजाधिराजश्रीकुमारपालदेवकारिते श्रीपार्श्वनाथसत्कमूलबिम्बसहितश्रीकुवरविहाराभिधाने जैनचैत्ये । सद्विधिप्रवर्तनाय बृहद्गच्छीयवादीन्द्रश्रीदेवाचार्याणां पक्षे आचन्द्रार्कं समर्पिते ॥ सं. १२४२ वर्षे एतद्देशाधिपचाहमानकुलतिलकमहाराजश्रीसमरसिंहदेवादेशेन भां० पासूपुत्र-भां० यशोवीरेण समुद्धृते श्रीमद्राजकुलादेशेन श्रीदेवाचार्यशिष्यैः श्रीपूर्णदेवाचार्यैः । सं. १२५६ वर्षे ज्येष्ठ सु० ११ श्रीपार्श्वनाथदेवे तोरणादीनां प्रतिष्ठाकार्ये कृते । मूलशिखरे च कनकमयध्वजादण्डस्य ध्वजारोपणप्रतिष्ठायां कृतायां । सं. १२६८ वर्षे दीपोत्सवदिने अभिनवनिष्पन्नप्रेक्षामध्यमंडपे श्रीपूर्णदेवसूरिशिष्यैः श्रीरामचन्द्राचार्यैः सुवर्णमयकलशारोपणप्रतिष्ठा कृता ॥ शुभं भवतु ॥ छ ॥"

संशोधनसमयेऽस्य नाटकस्यैकमेव पुस्तकं पत्तनस्थवाडीपार्श्वनाथसत्कपुस्तकभाण्डागारात्सुश्रावक—वाडीलाल-हीराचन्द-दलालद्वाराऽऽसादितम् । तच्चातीवाशुद्धं पुरातनं क्वचित्क्वचित्पतितपाठम् । तदाधारेणैव संशोधितमिदम् । क्वचित्क्वचिदर्थसंगतावसत्यामप्यादर्शान्तरालाभेन तथैव मुद्रितम् । तच्च धीमद्भिः संशोध्य वाचनीयमित्यभ्यर्थ्यते—

श्रीमच्चतुरविजयचरणोपासकः
पुण्यविजयः ।

['प्रबुद्धरौहिणेय'स्य सम्पादकीयनिवेदनम्, भावनगर, ई. स. १९१८]

*

Jain Education International For Private & Personal Use Only www.jainelibrary.org